CIVIL SERVICES (MAIN) EXAM-2022



# संस्कृतम्

( अनिवार्यम् )

| समयः होरात्रयम् (घण्टा-त्रयम्) | पूर्णाङ्काः 300 |
|---|---|

**प्रश्नपत्रविषये विशेषनिर्देशाः**

**प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः**

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नोचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

# SANSKRIT

**( Compulsory )**

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

**1.** अधोलिखितेषु विषयेषु कमपि **एकं** विषयमधिकृत्य षट्शत-शब्दैः (*600* परिमितशब्दैः) निबन्धो लेखनीयः — 100

(*a*) नवीकरणीया ऊर्जा : संभावनाः काठिन्यानि च

(*b*) संचारक्रान्तेः महत्त्वम्

(*c*) क्रीडानां वर्धमानं व्यवसायीकरणम्

(*d*) खाद्यपेयानां स्वास्थ्योपरि प्रभावः

**2.** अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारं तदधस्ताद् प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया संक्षेपतश्च स्वगिरा साधु दीयताम्— 12×5=60

औपनिवेशिकं शासनं विशालपरिमाणवतां तथ्यानां संग्रहोपरि आधारितमासीत्। आंग्लदेशीयाः स्वव्यवसायं चालयितुं व्यापारिकगतिविधीनां विस्तृतं विवरणं संरक्षितवन्तः। वर्धमानेषु नगरेषु जीवनस्य गतिं दिशं च अन्वेक्षितुं ते नियमितरूपेण सर्वेक्षणं कुर्वन्ति स्म, सांख्यिकीयं परिमाणं एकत्रीकुर्वन्ति स्म एवं विभिन्नान् सर्वकारीय विवरणान् प्रकाशयन्ति स्म।

प्रारंभिकेषु वर्षेष्वेव औपनिवेशिकः सर्वकारः मानचित्राणां निर्माणोपरि विशेषं ध्यानं दत्तवान्। सर्वकारस्य विचारः आसीत् यत् कस्यापि स्थानस्य निर्मितिं भूदृश्यं च अवगन्तुं मानचित्राणि आवश्यकानि भवन्ति। अस्य तथ्यस्य साहाय्येन ते तत्रत्यस्य स्थानस्योपरि अधिकम् उत्तमं नियन्त्रणं कर्तुं समर्थाः भवन्ति स्म। यदा नगराणि वर्धमानानि अभवन् तदा न केवलं तेषां विकासयोजनाः निर्मापयितुं अपितु व्यवसायं वर्धयितुं एवं स्वसत्तां दृढीकर्तुमपि मानचित्राणि निर्मितानि। नगराणां मानचित्रेभ्यः वयं तस्य स्थानस्य पर्वतानां नदीनां हरीतिमयाः विषये ज्ञातुं शक्नुमः। एतानि सर्वाणि वस्तूनि सुरक्षोद्देश्याय योजनानिर्माणकर्मणि अधिकानि सहायकानि भवन्ति। एतदतिरिच्य घट्टानां स्थानेभ्यः गृहाणां सघनतायाः गुणवत्तायाः मार्गाणां स्थितेः च तस्य स्थानस्य व्यावसायिकसंभावनाः विज्ञातुं शक्यते तथा कराधानस्य रणनीतिनिर्माणे सहायतां प्राप्तुं शक्यते।

ऊनविंशशताब्दस्य अंतिमे समये आंग्लदेशीयाः नगरपालिकायाः वार्षिककरसंग्रहमाध्यमेन नगराणां संरक्षणाय अर्थसंग्रहाय प्रयत्नान् प्रारब्धवन्तः। विवादानां परिहाराय ते कतिपयानि दायित्वानि निर्वाचितान् भारतीयप्रतिनिधिन् अपि दत्तवन्तः। आंशिकलोकप्रतिनिधित्वेन नगरनिगमसदृशानां संस्थानाम् उद्देश्यं यथा जलापूर्तिः, जलनिष्कासनं, मार्गनिर्माणं, स्वास्थ्यव्यवस्थासदृशानां सेवानामुपलब्धिकरणम् आसीत्। अन्यतः नगरनिगमानां गतिविधिभ्यः नूतनरीत्या तथ्यपत्राणि जनितानि यानि नगरपालिकायाः तथ्यगृहे सयत्नं सुरक्षितानि।

नगरस्य विस्तारोऽपरि अन्वेक्षणाय नियमितरूपेण जनगणना भवति स्म। ऊनविंशशताब्दस्य मध्यकालं यावत् विभिन्नक्षेत्रेषु कतिपयानां स्थानीयस्थलानां जनगणना भवति स्म। अखिलभारतीयजनगणनायाः प्रथमः प्रयासः 1872 तमे वर्षे कृतः। तत्पश्चात् 1881 शताब्दतः दशकीया जनगणना एका नियमिता व्यवस्था जाता। भारते नगरीकरणस्य अध्ययनाय जनगणनातः निःसृतं संख्यापरिमाणम् एकं बहुमूल्यं स्रोतः अस्ति।

यदा वयम् एतान् विवरणान् पश्यामः तदा इदं प्रतीयते यत् अस्माकं निकटे ऐतिहासिकं परिवर्तनं परिमापयितुं यथार्थतथ्यानि उपलब्धानि सन्ति। रोगजनितानां मृत्युसारणीनाम् अन्तहीना प्रक्रिया अथवा वयलिङ्गजातिव्यवसायानुसारं जनगणनाव्यवस्थया संख्यानां एकः विशालः भण्डारः प्राप्यते। येन यथार्थतायाः भ्रमः उत्पद्यते। किन्तु इतिहासकारैः प्राप्तं यत् एतत् संख्यापरिमाणं

भ्रामकम् अपि भवितुं शक्योति। एतेषां संख्यापरिमाणानां विनियोगात् प्रागेव अस्माभिः स्पष्टमेव अवगन्तव्यं यत् संख्यापरिमाणं ते कथं केन च कृतवन्तः। अस्माभिः इदमपि ज्ञातव्यं यत् केषाश्चित् वस्तूनां मापनं जातं केषामपि न जातम् इति।

(a) औपनिवेशिकशासनसञ्चालने संख्यापरिमाणानां किं किं महत्त्वमासीत्?

(b) औपनिवेशिकशासकानां कृते मानचित्रं कथं महत्त्वपूर्णम् आसीत्?

(c) औपनिवेशिकाभिलेखानां माध्यमेन नगरीकरणस्य अध्ययनं कथं कर्तुं शक्यते?

(d) इतिहासकाराः संख्यापरिमाणं सदैव सन्देहमुक्तमिति कथं न स्वीकुर्वन्ति?

(e) औपनिवेशिकशासकानां करसम्बद्धा नीतिः का आसीत्?

**3.** अधस्तनगद्यभागस्य संक्षेपः मूलभागस्य तृतीयांशपरिमितो स्वशब्दैरेव लेख्यः। शीर्षको न प्रदेयः — 60

साधारणतया 'विकास'शब्दस्याभिप्रायः समाजविशेषस्य स्थितिः तथा समाजद्वारा अनुभूता परिवर्तनप्रक्रिया इति। मानवेतिहासस्य दीर्घान्तराले समाजः तथा तस्य जैव-भौतिक पर्यावरणस्य निरंतरं प्रचलिताः अंतःक्रियाः समाजस्य स्थितिं निर्धारयन्ति। मानवपर्यावरणयोः अंतःक्रियायाः प्रक्रियाः अस्य तथ्यस्योपरि निर्भरयन्ति यत् समाजः कीदृशं प्रौद्योगिकं विकासं कृतवानस्ति एवं कीदृशीनां संस्थानां पोषणं कृतवानस्ति। प्रौद्योगिकी तथा चान्याः संस्थाः मानवपर्यावरणयोः अंतःक्रियाः गतिशीलाः कृतवत्यः। तेन उत्पन्नेन संवेगेन प्रौद्योगिक्याः स्तरः समुन्नतः जातः। अनेकानां संस्थानां निर्माणं रूपान्तरणं च जातम्। अतः विकासः एका बहु-आयामी संकल्पना अस्ति। सः अर्थव्यवस्थायां, समाजे पर्यावरणे च सकारात्मकस्य अनुत्क्रमणीयस्य च परिवर्तनस्य द्योतकः अस्ति।

विकासस्य संकल्पना गतिशीला भवति। अस्याः संकल्पनायाः प्रादुर्भावः विंशशताब्द्याः उत्तरार्द्धे अभवत्। सत्त्वेऽपि द्वितीये विश्वयुद्धे विकासस्य संकल्पना आर्थिकवृद्धेः पर्यायः आसीत्। येन सकलस्य राष्ट्रियोत्पादस्य प्रतिव्यक्तेः आयस्य, प्रतिव्यक्तेः उपभोगस्य च समयेन सह वृद्धिरूपेण माप्यते परंतु अधिकार्थिकवृद्धिवत्सु देशेषु अपि असमानवितरणकारणात् दारिद्र्यस्य स्तरः द्रुतगत्या वर्धितः। अतः 1970 तमे शताब्दे 'पुनर्वितरणेन सह वृद्धिः' तथा 'वृद्धिः तथा समानता' सदृशाः वाक्यांशाः विकासस्य परिभाषायां सम्मिलिताः। पुनर्वितरणस्य समानतायाश्च प्रश्नेभ्यः निर्वर्तनानन्तरम् इदम् अनुभूतं यत् विकासस्य संकल्पनां मात्रं आर्थिकप्रक्षेत्रं यावत् सीमितीकर्तुं न शक्यते। अस्मिन् जनकल्याणं, निवासस्तरः, जनस्वास्थ्यं, शिक्षा, समानसुयोगप्राप्तिः राजनैतिकं नागरिकमधिकारसम्बद्धाः विषयाः सम्मिलिताः भवन्ति। 1980 तमं शताब्दं यावत् विकासः एकः बहु-आयामिसंकल्पनारूपेण समागतः यस्मिन् समाजस्य सर्वेषां कृते वृहत्स्तरोपरि सामाजिकं भौतिकं च कल्याणं समाविष्टम्।

1960 तमशताब्दस्य दशकान्ते पश्चिमजगति पर्यावरणसम्बद्धानां विषयाणां जागरूकतावृद्धिकारणात् सततपोषणीयधारणायाः विकासः अभवत्। अस्मिन् पर्यावरणोपरि औद्योगिकविकासस्य अनपेक्षितानां प्रभावानां विषये जनानां चिन्ताः प्रकटिताः अभवन्।

पर्यावरणविषये विश्वसमुदायस्य वर्धमानां चिन्तां ध्याने संस्थाप्य संयुक्तराष्ट्रसंघः 'विश्वपर्यावरणं एवं विकास-आयोगस्य (WCED)' स्थापनां कृतवान् यस्य प्रमुखः नार्वेदेशस्य प्रधानमंत्री 'ग्रो हर्लेम ब्रंटलैंड' आसीत्। सः आयोगः स्वविवरणम् 'अवर कॉमन फ्यूचर' नामधेयं (यत् ब्रंटलैंड-विवरणमपि कथ्यते) 1987 तमे शताब्दे प्रस्तुतं कृतवान्। तेन

सततपोषणीयविकासस्य ऋजु-सरल-वृहत्स्तरेषु प्रयुक्तानां शब्दानां परिभाषाः प्रस्तुतीकृताः। अस्य विवरणस्यानुसारं सततपोषणीयविकासस्य अयमेव अर्थः —''एकः एतादृशः विकासः यस्मिन् भविष्यति आगन्तॄणां जनानाम् आवश्यकतापूर्तिं प्रभाविताम् अकृत्वा वर्तमानानां जनानाम् आवश्यकतापूर्तीकरणम्।''

**4.** अधोलिखितगद्यांशस्य आंग्लभाषया अनुवादः करणीयः — 20

प्रेमचन्देन कथितमासीत् यत् कथाः तु चतुर्पार्श्वे वायुमण्डले विकीर्णाः सन्ति। प्रश्नस्तु तासां धारणम्। इदम् एतदर्थं भवति यत् प्रत्येकं जनस्य प्रत्येकं वस्तुनश्च स्वं स्वं जीवनं भवति। अन्येभ्यः सर्वेभ्यः पृथगिति। तस्य एकः आरंभः, विकासः पुनः अन्तोऽपि भवति। प्रत्येकं जनस्य काऽपि एका कथा भवति। यथा एकस्य जनस्य प्रकृतिः अन्येन जनेन सह न मिलति तथा तस्य जीवनकथाऽपि अन्यस्य जीवनकथया साकं न मिलति।

एतादृशः कोऽपि जनः नास्ति यः स्वकथां लेखितुं न शक्नोति। मम आत्मकथा मम जीवनस्य कथा एव। इयं केवलं मम कथा। यावत्पर्यन्तं मम जीवनम् अन्येषां जीवनानि स्पृशति तावदेव इयम् अन्येषामपि कथा भवति। यावत्पर्यन्तं मम जीवनम् एकस्य जीवनस्य, समयस्य, समाजस्य, समूहस्य वा प्रतिनिधिजीवनं भवति तावदेव इयं सर्वेषां कथा भवति। प्रत्येकं जनस्य जीवनकथायां परिवर्तनं करणीयमेव।

भवान् कलमं हस्तेन धारयति एवं कर्गजोपरि किमपि लेखितुं प्रयतते। सर्वेभ्यः इदम् उत्तममस्ति स्वजीवनादेव प्रारभेत्। स्वविषये बाल्यादारभ्य अद्यावधि यत् सर्वं घटितं तत् सर्वं लिखितम्। इयम् आत्मकथा। आत्मकथायाः प्रथमः संकल्पः भवति—स्पष्टं सत्यं च कथनम्।

एतदर्थम् अभ्यासः आवश्यकः। नैतिकसाहसोऽपि। यदि सम्पूर्णा आत्मकथा न लेखितुं शक्यते तर्हि संस्मरणं दैनन्दिनीं वा लेखितुं शक्यते। कतिपयानां दिनानां वर्षाणां वा दैनिकानि विवरणानि आत्मकथारूपेण परिणमते।

**5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः — 20

Socrates was one of the celebrated Greek thinkers who became very influential in the development of Greek philosophy in particular and Western philosophy in general.

Socrates tried to bring radical changes in the society. But his attempts in the social field were not accepted and appreciated by the authorities. But convinced of his principles Socrates continued his efforts. The authorities considered him as a threat to their existence and as a result he was arrested and sent to prison. Later, he was given capital punishment because he was frank and outspoken. When he received the news of the death penalty he was not at all shaken.

It confused all the officials and even Socrates' own disciples because they had never seen a person accepting the news of his death penalty with a smiling face. When asked why so, he replied, "I have been preparing for death all my life. I have never done anything wrong to any man. That is why I am able to accept even death with a smiling face."

In his use of critical reasoning, by his unwavering commitment to truth and through the vivid example of his own life, Socrates set the standard for all subsequent Western philosophy.

**6.** *(a)* अधोलिखितानां स्वरचितवाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* नाम

*(ii)* यावत्

*(iii)* एकधा

*(iv)* हि

*(v)* साकम्

*(b)* पदसाधनं क्रियताम्— 1×10=10

*(i)* दधि + प्रथमा, बहुवचनम्

*(ii)* जगत् + प्रथमा, द्विवचनम्

*(iii)* मति + तृतीया, बहुवचनम्

*(iv)* आत्मन् + प्रथमा, बहुवचनम्

*(v)* सरित् + षष्ठी, एकवचनम्

*(vi)* हृ + लङ्, मध्यमपुरुषे बहुवचनम्

*(vii)* दा + लृट्, उत्तमपुरुषे द्विवचनम्

*(viii)* युध् + विधिलिङ्, प्रथमपुरुषे एकवचनम्

*(ix)* क्री + लट्, उत्तमपुरुषे एकवचनम्

*(x)* रुद् + लट्, प्रथमपुरुषे बहुवचनम्

*(c)* समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

*(i)* दिनं प्रति

*(ii)* नराणां पतिः

*(iii)* कृष्णश्चासौ सर्पः

*(iv)* बाणेन आहतः

*(v)* द्विजाय इदम्

(*d*) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(*i*) रामः गोविन्दं सह गच्छति।

(*ii*) सीता रामं स्निह्यति।

(*iii*) मनोजः ग्रामे अधिवसति।

(*iv*) वृक्षेन पत्रं पतति।

(*v*) मां पुस्तकं रोचते।

★ ★ ★